वर्द्धके २विष्णौ पु० "प्रियकृत् प्रीतिवर्द्धनः" विष्णुस० ।

**प्रु** सर्पणे भ्वा० आत्म०सक० अनिट् । प्रवते अप्रोष्ट पुप्रुवे ।

**प्रुट** मर्दने भ्वा० पर०सक० सेट् । प्रोटति अप्रोटीत् पुप्रोट । अयं धातुपाठे पठितः ।

**प्रुष** भस्मीकरणे भ्वा० पर० सक० सेट् । प्रोषति अप्रोषीत् पुप्रोष । उदित् क्त्वा वेट् । प्रुषित्वा प्रुष्ट्वा प्रुष्टः ।

**प्रुष** सेके पूर्त्तौ च सक० स्नेहे अक० क्र्या० पर०सेट् । प्रुष्णाति अप्रोषीत् पुप्रोष ।

**प्रुष्ट** त्रि० प्रुष–क्त । दग्धे । [बिन्दौ सि०कौ० ।

**प्रुष्व** पु० प्रुष–क्वन् । १ऋतौ २सूर्य्ये च उज्ज्वल० । ३जल-

**प्रेक्षा** स्त्री प्र+ईक्ष–भावे अङ् । १विषयशुभाशुभपर्य्यालोचनायां २बुद्धिपूर्व्वककर्मकरणे ततः प्रेक्षादि० चतुरर्थ्यामिनि । प्रेक्षिन् आलोचनानिर्द्धर्त्तादौ । अस्मिन्शब्दे परे घोषादि० पूर्व्वपदमुदात्तम । [प्रेक्षागृहादयोऽप्यत्र ।

**प्रेक्षागार** न० ६त० । राज्ञां मन्त्रणार्थगृहे हरिवं० ८५अ०

**प्रेक्षादि** चतुरर्थ्यामिनि प्रत्ययनिमित्ते शब्दगणः स च गणः पा०ग० उक्तो यथा "प्रेक्षा हलका बन्धुका ध्रुवका क्षिपका न्यग्रोध इक्कट कङ्कट सङ्कट कटकूप धुक पुक पुट मह परिवाप यवास ध्रुवका गर्त्त कूपक हिरण्य" ।

**प्रेक्षावत्** त्रि०प्रेक्षा अस्त्यर्थे मतुप् मस्य वः । समीक्ष्यकारिणि ।

**प्रेङ्खण** न० प्र+इखि–ल्युट् णत्वम् । १प्रकर्षेण चलने अष्टादशरूपकान्तर्गते २रूपकभेदे तल्लक्षणं सा०द० उक्तं यथा "गर्भावमर्शरहितं प्रेङ्खणं हीननायकम् । असूत्रधारमेकाङ्कमविष्कम्भप्रवेशकम् । नियुद्धसम्फोटयुतं सर्व्ववृत्तिसमाश्रितम् । नेपथ्ये गीयते नान्दी तथा तत्र प्ररोचना" ।

**प्रेङ्खा** स्त्री प्र+इखि वा० आधारे अङ् । १दोलायाम् अमरः भावे अङ् । २परिभ्रमणे ३स्वार्थकगतौ अश्वगतौ इति पाठान्तरम् । ४गृहभेदे मेदि० ५नृत्ये च धरणिः ।

**प्रेङ्खित** त्रि० प्र+इखि–क्त । कम्पिते अमरः ।

**प्रेङ्खोल** दोलने अद०चुरा०उभ०सक० सेट् । प्रेङ्खोलयति ते अपिप्रेङ्खोलत् त । प्रस्योपसर्गत्वमपीच्छन्तीत्यन्ये तेन प्राञ्चिखोलत् त इत्येवरूपम् ।

**प्रेण** गतिप्रेरणाश्लेषणेषु भ्वा०पर० सक० सेट् माधवः । प्रेणति अप्रेणीत् ऋदित् अपिप्रेणत् त ।

**प्रेणि** त्रि० प्रेण–इन् । प्रेरके ऋ० १।११२।१० भा० ।

**प्रेत** त्रि० प्र–इ–क्त । १मृते अमरः । २नरकस्थे जीवभेदे ३पिशाचभेदे आतिवाहिकदेहोत्तरं ४जायमानदेहभेदयुते और्द्ध्वदेहिकक्रियाऽभावे तद्रूपप्राप्तिकथा पाद्मोत्त०ख० १६अ० यथा "ततो बहुतिथे काले स राजा पञ्चताङ्गतः । वैदिकेन विधानेन न लेभे चौर्द्ध्वदेहिकम् । विष्णुप्रद्वेषभावेण युगानां सप्तविंशतिम् । भुक्त्वा च यातनां यामीं निस्तीर्णनरको नृपः । स्वमया गिरिराजन्तु पिशाचोऽभूत्तदा महान्" । तस्य रूपं यथा "देवद्युतिरधीयानः शुश्राव करुणस्वनम् । समागत्य ततस्तत्र तं पिशाचं ददर्श सः । विकरालमुखं दीनं पिशङ्गनयनं भृशम् । ऊर्द्ध्वमूर्द्धजलक्षणाङ्गं यमदूतमिवापरम् । चलजिह्वञ्च लम्बोष्ठं दीर्घजङ्घशिराकुलम् । दीर्घाङ्घ्रिं शुष्कतुण्डञ्च गर्त्ताक्षं शुष्कपञ्जरम्" । और्द्ध्वदेहिककरणेऽपि केषाञ्चित् कर्मविशेषेण प्रेतत्वप्राप्तिस्तत्रोक्ता यथा "हविर्जुह्वति नाग्नौ ये गोविन्दं नार्चयन्ति ये । लभन्ते नात्मविद्याञ्च सुतीर्थविमुखाश्च ये । सुवर्णं वस्त्रताम्बूलं रत्नमन्नं फलं जलम् । आर्त्तेभ्यो न प्रयच्छन्ति सर्व्वेषु क्षतदारकाः । ब्रह्मस्वञ्च स्त्रीधनानि लोभादेव हरन्ति ये । बलेन छद्मना वापि धूर्त्ताश्च परवञ्चकाः । नास्तिकाः कुहकाश्चौरा ये चान्ये वक्रवृत्तयः । बालवृद्धातुरस्त्रीषु निर्दयाः सत्यवर्जिताः । अग्निदा गरदा ये च ये चान्ये कूटसाक्षिणः । अगम्यागामिनः सर्व्वे ये चान्ये ग्रामयाजिनः । आधाचरणसम्पन्ना वर्णादिधर्मवर्जिताः । ये चोपदेवदनुजरक्षोयक्षादिसेविनः । सर्व्वदा मादकद्रव्यपानमत्ता हरिद्विषः । देवतोद्दिष्टपतितव्यपश्राद्धान्नभोजिनः । असत्कर्मरता नित्यं सर्व्वपातकपापिनः । पाषण्डधर्माचरणाः पुरोधोवृत्तिजीविनः । पितृमातृस्नुषापत्यस्वदारत्यागिनश्च ये । ये कदर्य्याश्च लुब्धाश्च नास्तिका धर्मदूषकाः । त्यजन्ति स्वामिनं युद्धे त्यजन्ति शरणागतम् । गवां भूमेश्च हर्त्तारो ये चान्ये रत्नदूषकाः । महाक्षेत्रेषु सर्व्वेषु प्रतिग्रहरताश्च ये । परद्रोहरता ये च तथा ये प्राणिहिंसकाः । परापवादिनः पापा देवतागुरुनिन्दकाः । कुप्रतिग्राहिणः सर्व्वे सम्भवन्ति पुनःपुनः । प्रेतराक्षसपैशाच्यतिर्य्यग्वृक्षकुयोनिषु । न तेषां सुखलेशोऽस्ति इह लोके परत्र च" । पाद्मोत्तरखण्डे १८ अ० । पञ्चप्रेतोपख्यानं तत्रैव यथा "ब्राह्मण उवाच प्रेतानां नाम जातीनां युष्माकं सम्भवः कथम् । किं तत् कारणमुद्दिश्य यूयमीदृशनामकाः" । प्रेता ऊचुः "अहं स्वादु सदा भुक्त्वा दद्यां पर्युषितं